॥ श्रीः ॥

## ॥ तोटकाष्टकम् ॥

विदिताखिलशास्त्रसुधाजलधे
महितोपनिषत्कथितार्थनिधे ।
हृदये कलये विमलं चरणम्
भव शङ्करदेशिक मे शरणम् ॥ १

करुणावरुणालय पालय मां
भवसागरदुःखविदूनहृदम् ।
रचिताखिलदर्शनतत्त्वविदम्
भव शङ्करदेशिक मे शरणम् ॥ २

भवता जनता सुहिता भविता
निजबोधविचारणचारुमते ।
कलयेश्वरजीवविवेकविदम्
भव शङ्करदेशिक मे शरणम् ॥ ३

भव एव भवानिति मे नितराम्
समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिम्
भव शङ्करदेशिक मे शरणम् ॥ ४

सुकृतेऽधिकृते बहुधा भवतो
भविता समदर्शनलालसता ।
अतिदीनमिमं परिपालय माम्
भव शङ्करदेशिक मे शरणम् ॥ ५

जगतीमवितुं कलिताकृतयो
विचरन्ति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासि गुरो
भव शङ्करदेशिक मे शरणम् ॥ ६

गुरुपुङ्गव पुङ्गवकेतन ते
समतामयतां नहि कोऽपि सुधीः ।
शरणागतवत्सल तत्त्वनिधे
भव शङ्करदेशिक मे शरणम् ॥ ७

विदिता न मया विशदैककला
न च किञ्चन काञ्चनमस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजाम्
भव शङ्करदेशिक मे शरणम् ॥ ८

इति श्रीतोटकाचार्यविरचितं तोटकाष्टकं सम्पूर्णम् ॥

